# प्राच्नव्ययोर्मते समासलक्षणम्

संदीपकुमार मीणा

समसनं समासः। समुपसर्गपूर्वकासधातो हलश्चेति सुत्रेणाधिकरणे घञ् प्रत्यये कृते समासशब्दस्य सिद्धिर्भवति। समसनमत्र भावे घञ् समसनं नाम संक्षेपीकरणम्। संक्षेपीकरणञ्च अनेकेषां पदानामेकीभवनम्। तच्च स्वाव्यवहितोत्तरविभक्तिमपाकृत्य परस्परं सम्मेलनरूपम्। एवञ्च यत्रानेकानि पदानि स्वप्रकृतिकविभक्तिमपाकृत्य परस्परं सम्मिलितानि विशिष्टार्थबोधकानि स्युस्तत्र समास इति व्यवहारः। परन्तु समासस्यैवंविधे लक्षणे क्रियमाणे सुबन्तस्थले दोषाभावेऽपि पचतभृज्जता "खादतमोदता" तिङन्तपदानां समासे उक्तलक्षणस्यानागमनादव्याप्तिः स्यादिति समासाधिकारपठितसंज्ञात्वं समासत्वमिति निर्दुष्टं तल्लक्षणं वेदितव्यम्। अत्र केचित्–

समासत्वं च– व्याकरणशास्त्रप्रणेतृपाणिन्यादि मुनिकृतसंकेतसम्बोधने समासपदत्वम्। यस्मिन् समुदाये पदद्वयं परस्परं समस्यते च समुदायः समासः। यद्वा समासत्वम् अखण्डोपाधिविशेषः। एवञ्चाखण्डधर्मतत्वं, सङ्केतसम्बन्धेन समासपदत्वं वा समासत्वम् इत्याहुः। प्राचीनमतानुसारेण कृत्तद्धितैकशेषसनाद्यन्तधातुरूपा पञ्च वृतयो भवन्ति नव्यास्तु एकशेषवृतित्वं नेच्छन्ति। परार्थान्वितस्वार्थोपस्थापकत्वरूपवृत्तित्वस्य तत्राभावात्। अतएव समर्थः पदविधिः इति सूत्रस्याधिकारत्वपक्षे एकाशेषसंग्रहः उक्तो भाष्ये। तत्र सामर्थ्यं द्विविधम्। व्यपेक्षालक्षणम् एकार्थीभावलक्षणं च। तयोर्मध्ये स्वार्थपर्यवसायिनां पदानामकांक्षादिवशाद्यः परस्परान्वयस्तद्व्यपेक्षाविधं सामर्थ्यम्। विशिष्टा अपेक्षा व्यपेक्षेति व्युत्पत्तेः। सम्बान्धार्थः समर्थ इति व्युत्पत्तेश्च। इदं च राज्ञः पुरुष इत्यादिवाक्य एव भवति। तत्र चैकैकस्य शब्दस्य यः संनिहितो योग्यश्च तेनान्वयो भवति। तथा राज्ञो पुरुषश्चेति देवदतस्य च पुरुषः इति ऋद्धस्य राज्ञः पुरुष इति च। एकार्थी भावालक्षणं सामर्थ्य तु प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथग्गृहीतानां समुदाशक्त्या विशिष्टैकार्थप्रतिपादकत्वरूपम्। संगतार्थः समर्थः संसृष्टार्थः समर्थ इति व्युत्पत्तेः। संगतिः संसर्गश्चैकीभाव एव यथा संगतं घृतं तष्नोति, एकीभूतमिति गम्यते। यथा वा संसृष्टोऽग्निरिति, एकीभूत इति गम्यते इति भाष्याच्च। इदं च समर्थं इति व्युत्पत्तेः। इदं च सामर्थ्य राज्ञपुरुष इत्यादिवृत्तावेव। अत एव ऋद्धस्य राजपुरुष इत्येवं पुरुषविशेषणे राज्ञे ऋद्धत्वविशेषणं नान्वेति। विशिष्टस्यैकवाक्यतया राज्ञः पदार्थैकदेशत्वादित्याद्यर्थकमुक्तम्। देवदत्तस्य गुरुकुलमित्यत्र तु उपसर्जनस्य नित्यसापेक्षत्वात् समासः। यदा गुरुवद् देवदत्तोऽपि विशेष्ये प्रधाने कुल एवान्वेति, तत्र गुरुवा कुलस्य उत्पद्यसम्बन्धोनान्वयः। देवदत्तेन तु कुलस्य तदीयगुरुत्वोपात्ततयाऽन्वयो गुरुगर्भः। उक्तं च हरिणा–

सम्बन्धिशब्दसापेक्षो नित्यं सर्वैः समस्यते। वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते। इति समुदायेन सम्बन्धो येषां गुरुकुलादिना संस्पृश्यावयवास्ते तु युज्यते तद्धिता सह।। इति च।

*शोधार्थी, ज.रा.रा.सं.विश्वविद्यालय, जयपुरम्*